National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(67): 213-216
© 2026 NJHSR
www.sanskritarticle.com

**के . श्रावणी रेड्डि**
अनुसन्धात्री ,ज्योतिषविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः।

**मार्गदर्शकः**
**डॉ. कुष्णकुमारभार्गवः**
सहायकाचार्यः, ज्योतिष-वास्तुविभागः,
राष्ट्रियसंस्कृत-विश्वविद्यालयः,
तिरुपति।

**Correspondence:**
**के . श्रावणी रेड्डि**
अनुसन्धात्री ,ज्योतिषविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः।

# नृसिंहदैवज्ञविरचितस्य सौरभाष्यस्य परिचयः वैशिष्ट्यञ्च

**के . श्रावणी रेड्डि , डॉ. कुष्णकुमारभार्गवः**

भारतीयज्ञानपरम्परायां वेदाङ्गेषु **ज्योतिषशास्त्रस्य** स्थानम् अत्यन्तं महत्त्वपूर्णं वर्तते। *"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः"*[1] इति वचनानुसारं वैदिकयज्ञानां कालनिर्धारणाय खगोलविज्ञानस्य गणितस्य च विकासः अभवत्। कालक्रमेण सिद्धान्त-संहिता-होराभेदेन त्रिस्कन्धात्मकं ज्योतिषशास्त्रं सुसमृद्धं जातम्। एतेषु स्कन्धेषु **सिद्धान्तस्कन्धः** खगोलीयपिण्डानां गतिं, स्थितिं, ग्रहणं, गोलयन्त्रविचारं च सूक्ष्मगणितेन प्रतिपादयति।

सिद्धान्तग्रन्थेषु **'सूर्यसिद्धान्तः'** सर्वप्राचीनः, सर्वमान्यः, प्रामाणिकश्च ग्रन्थः मन्यते। अस्य ग्रन्थस्य श्लोकाः अत्यन्तं संक्षिप्ताः, सूत्रात्मकाः, गूढार्थगर्भिताश्च सन्ति। अतः कालान्तरे अनेके विद्वांसः अस्य उपरि टीकाः भाष्याणि च व्यरचयन्। तेषु भाष्यकारेषु सप्तदशशताब्द्यां वाराणस्यां विद्यमानः **आचार्यः नृसिंहदैवज्ञः** स्वस्य **'सौरभाष्यम्'** नाम्ना ग्रन्थेन ज्योतिषजगति अद्वितीयं स्थानम् अलभत। अस्य लेखस्य मुख्यः उद्देश्यः सूर्यसिद्धान्तस्य ऐतिहासिकी पृष्ठभूमिः, नृसिंहदैवज्ञस्य प्रामाणिकः वंशपरिचयः, तस्य कृतित्वं, तथा च सौरभाष्यस्य बहुविधवैशिष्ट्यानां गहनं विवेचनं वर्तते।

**प्राचीनसूर्यसिद्धान्तः तथा वर्तमानसूर्यसिद्धान्तः**

यद्यपि गणितस्कन्धे सूर्यसिद्धान्तादयः पञ्चसिद्धान्ताः (पैतामह-वासिष्ठ-रौमक-पौलिश-सौरसिद्धान्ताः) अतिप्राचीनाः सन्ति, तथापि तेषां मध्ये **सूर्यसिद्धान्तः स्पष्टतमः** इति आचार्यस्य वराहमिहिरस्य वचनात् ज्ञायते। किन्तु प्रकृतोपलब्धे सूर्यसिद्धान्ते वराहमिहिरोक्त-पञ्चसिद्धान्तिकागतस्य सूर्यसिद्धान्तस्य श्लोकाः भास्करोद्धृत सूर्यसिद्धान्तः भागाश्च न दृश्यन्ते। अतः अयं ग्रन्थः प्राचीनसूर्यसिद्धान्तात् भिन्नः इति ज्योतिषेतिहासकाराणाम् अभिप्रायः अस्ति। तस्मात् कारणात् अस्य नूतनसूर्यसिद्धान्तस्य **'वर्तमानसूर्यसिद्धान्तः'** इति व्यवहारः समपद्यत।

**(ख) कर्ता कालश्च**

सूर्यसिद्धान्तस्य आरम्भश्लोकैः ज्ञायते यत् सूर्यादेशात् सूर्यांशपुरुषः मयासुरं प्रति कृतयुगान्ते इदं शास्त्रम् उक्तवान्। शास्त्रीयगणनानुसारं कृतयुगान्तात् १९४८ तमे शके २१,६५१२७ वर्षाणि व्यतीतानि भवन्ति, अतः अस्य ग्रन्थस्य तावन्तः वर्षाः प्राचीनाः इति परम्परा मन्यते। किन्तु आधुनिक-इतिहासकाराः अन्यथा वदन्ति:

● **अल्बेरूनी-मतम्:** प्रसिद्धः यात्री विद्वान् अल्बेरूनी (शके ९६२) कथितवान् यत् सूर्यसिद्धान्तस्य कर्ता **लाटदेवः** इति। किन्तु यदि अयं ग्रन्थः लाटकर्तृकः स्यात्, तर्हि वराहमिहिरेण स्वपञ्चसिद्धान्तिकायां तन्नाम्ना अवश्यम् उल्लिखितो भवेत्; यतः तत्र तथा न वर्तते, तस्मात् लाटदेवस्य सूर्यसिद्धान्तकर्तृत्वं न युज्यते। एतावता कालेन ज्योतिषेतिहासकारैः अस्य वास्तविकः कर्ता न निर्णीतः, परं तु अस्य रचना **पञ्चमशतकस्य (5th Century CE)** आसन्नकाले अभवत् इति बहवः विमर्शकाः वदन्ति।

**वर्तमानसूर्यसिद्धान्तस्य चतुर्दश अधिकाराः**

वर्तमानसूर्यसिद्धान्ते आहत्य **चतुर्दश (१४) अधिकाराः** तथा प्रायः ४९८ **श्लोकाः** (पाठभेदेन ४९८-५००) विद्यन्ते, येषां क्रमः अधोलिखितः अस्ति:

| क्रम संख्या | अधिकारस्य नाम | मुख्यः विषयः |
|---|---|---|
| १. | **मध्यमाधिकारः** | कालमानं, युगभगणाः, मध्यग्रहसाधनं च। |
| २. | **स्पष्टाधिकारः** | मन्दशीघ्रफलसंस्कारः, ग्रहस्पष्टीकरणं, नक्षत्रानयनञ्च। |
| ३. | **त्रिप्रश्नाधिकारः** | दिक्-देश-कालानां ज्ञानं, शङ्कुच्छाया-लग्न-नतोन्नता दिसाधनम्। |
| ४. | **चन्द्रग्रहणाधिकारः** | चन्द्रग्रहणस्य सम्भवः, स्थित्यर्ध-विमर्दार्ध-स्पर्शमोक्ष-गणितम्। |
| ५. | **सूर्यग्रहणाधिकारः** | लम्बन-नतिसंस्कारपूर्वकं सूर्यग्रहणस्य सूक्ष्मगणितम्। |
| ६. | **छेद्यकाधिकारः** | परिलेखविधिना भूमिभागे ग्रहणस्य प्रत्यक्षचित्रणम्। |
| ७. | **ग्रहयुत्यधिकारः** | भौमादिपञ्चतारागृहाणां परस्परं युतिः युद्धञ्च। |
| ८. | **भग्रहयुत्यधिकारः** | नक्षत्रैः सह ग्रहाणां योगः (नक्षत्रध्रुवकाः)। |
| ९. | **उदयास्ताधिकारः** | ग्रहाणां सूर्येण सह अस्तंगमनम् उदयनञ्च। |
| १०. | **चन्द्रशृङ्गोन्नत्यधिकारः** | चन्द्रस्य कलावृद्धिः शृङ्गोन्नतेश्च गणितम्। |
| ११. | **पाताधिकारः** | सूर्यचन्द्रयोः क्रान्तिसाम्यरूपस्य महापातस्य विचारः। |
| १२. | **भूगोलाधिकारः** | ब्रह्माण्ड-भूगोल-खगोलसंस्थानं, मेरु-कुमेरुवर्णनञ्च। |
| १३. | **ज्योतिषोपनिषदधिकारः** | गोलयन्त्र-कपाल-शङ्कु-घटिकादिखगोलीययन्त्राणां निर्माणम्। |
| १४. | **मानाधिकारः** | ब्राह्म-दैव-पित्र्य-प्राजापत्य-सौर-चान्द्रादिनविधमानानां वर्णनम्। |

**२ . नृसिंहदैवज्ञस्य प्रामाणिकः वंशपरिचयः**

सौरभाष्यकारेण नृसिंहदैवज्ञेन स्वस्य भाष्यान्ते तथा च *वासनावार्तिकस्य* अन्ते स्वकीयं विशदं वंशपरिचयं प्रस्तुतम्। तेन ज्ञातं भवति यत् असौ **भारद्वाजगोत्रीयः**, **तैत्तिरीयशाखाध्यायी** ब्राह्मणः आसीत्। गोदावरीनद्याः उत्तरतीरे स्थिते **'गोलग्रामे'** अस्य पूर्वजाः न्यवसन्, अतः अयं वंशः **'गोलवंशः'** इति प्रसिद्धः अभवत्।

**(क) नृसिंहदैवज्ञस्य वंशवृक्षः**

नृसिंहदैवज्ञस्य स्वलिखितश्लोकानुसारं तस्य वंशपरम्परा एवं प्रकारेण अस्ति:

1. **रामदैवज्ञः :** गोदावरीतीरस्थे गोलग्रामे भारद्वाजगोत्रे गणकाग्र-गण्यः रामः बभूव, यः महाराष्ट्रे सुगीतकीर्तिः आसीत्।

2. **भट्टाचार्यः (प्रपितामहः):** रामदैवज्ञस्य पुत्रः भट्टाचार्यः आसीत्। सः तैत्तिरीयाणाम् अग्रणीः तथा च द्वितीयः कुमारिलभट्ट इव श्रेष्ठः मीमांसकः आसीत्।

3. **दिवाकरदैवज्ञः (पितामहः):** भट्टाचार्यस्य सुतः दिवाकरः आसीत्। सः **गणेशदैवज्ञस्य** (ग्रहलाघवकारस्य) शिष्यः आसीत्। दिवाकरः गोलग्रामं विहाय काश्यां (वाराणस्याम्) आगत्य न्यवसत्, यत्र वेदान्तशास्त्राभ्यासं कुर्वन् पुण्यराश्यां काश्यां तनुमुत्ससर्ज। तस्य पञ्च विद्वांसः पुत्राः बभूवुः — **कृष्णः, विष्णुः, मल्लारिः, केशवः, विश्वनाथश्च**।

4. **कृष्णदैवज्ञः (पिता) पितृव्याश्चः** दिवाकरस्य ज्येष्ठपुत्रः **श्रीकृष्णदैवज्ञः** आसीत्, यः **अखिलशास्त्रवेत्ता** इति प्रसिद्धः आसीत्। तस्य अनुजाः (नृसिंहस्य पितृव्याः) विष्णुः, मल्लारिः, केशवः, विश्वनाथश्च सर्वेऽपि महान्तः ज्योतिर्विदः आसन्।

5. **नृसिंहदैवज्ञः (भ्राता च):** श्रीकृष्णदैवज्ञस्य कृपालवेन स्वपितुः तथा पितृव्याणां (विशेषतः मल्लारि-विश्वनाथयोः) सकाशात् समस्तविद्याः प्राप्य **नृसिंहः** महान् आचार्यः अभवत्। तस्य **शिवः** नाम्ना एकः भ्राता अपि आसीत्।

6. **नृसिंहस्य पुत्राः:** नृसिंहदैवज्ञस्य चत्वारः विद्वांसः पुत्राः अभवन् - **दिवाकरः, कमलाकरः, गोपीनाथः, रङ्गनाथश्च**। एतेषु कमलाकरः *सिद्धान्ततत्त्वविवेकस्य* रचयिता विश्वविख्यातः अभवत्।

**(ख) जन्मकालः शिक्षा च**

नृसिंहदैवज्ञस्य स्ववचनानुसारं तेन शके १५३३ तमे वर्षे स्वस्य पञ्चविंशतिमे (२५) वयसि सौरभाष्यं रचितम्। अनेन सिद्ध्यति यत् तस्य जन्म **शकसंवत् १५०८ (ईसवीय १५८६ तमे वर्षे)** काश्यां सम्पन्नम्। बाल्यकालादेव सः मीमांसा-वेदान्त-व्याकरण-गणित-गोलशास्त्राणां पारङ्गतः विद्वान् आसीत्।

नृसिंहदैवज्ञेन स्वस्य *वासनावार्तिकस्य* अन्ते स्पष्टतया लिखितम् अस्ति:

***"गुणवेदशरेन्दुसम्मिते १५४३ शाककाले नरेशितुः।***[2]
***वसता वाराणसीमध्यगे नरसिंहेन विनिर्मितं त्विदम्॥***

*निजतत्त्वमिते वर्षे सौरभाष्यं मया कृतम्। पञ्चत्रिंशन्मिते वर्षे वासनावार्तिकं कृतम्॥"* [3]

अत्र **'तत्त्व'** शब्देन पञ्चविंशतिः (२५) इति संख्या गृह्यते। एतस्मात् प्रमाणात् असौ **सौरभाष्यं शके १५३३ (ई. १६११) तमे वर्षे स्वपञ्चविंशतितमे वयसि** व्यरचयत् इति निःसन्देहं ज्ञायते। यद्यपि सौरभाष्ये उत वासनावार्तिके कुत्र सौरभाष्यं रचयामास इति स्थानस्य स्पष्टः निर्देशः न दृश्यते, तथापि काशीवासी सः काश्याम् एव तद् ग्रन्थं रचयामास इति कथनं सर्वथा युज्यते।

**४. सौरभाष्यस्य वैशिष्ट्यम्**

सूर्यसिद्धान्तस्य विद्यमानासु सर्वासु टीकासु **सौरभाष्यम् मुकुटायमानम्** इत्यत्र न कोऽपि संशयः। अस्य श्रेष्ठत्वस्य प्रमुखाणि कारणानि अधो निर्दिश्यन्ते:

**(१) कर्तृवैलक्षण्यं तथा सिद्धान्तशिरोमणिना सह समन्वयः**

नृसिंहदैवज्ञः न केवलं सूर्यसिद्धान्तस्य उपरि सौरभाष्यं रचितवान्, अपितु भास्कराचार्यस्य *सिद्धान्तशिरोमणेः* उपरि **'वासनावार्तिकम्'** अपि कृतवान्। विद्यमानासु अनेकासु सिद्धान्तशिरोमणिटीकासु (गणेशदैवज्ञादिकृतासु) वासनावार्तिकमेव बहुषु स्थलेषु विदुषाम् उपकाराय कल्पते। नृसिंहः भास्करात् अर्वाचीनः अपि यावदपि भास्करोक्तं सम्यक्तया व्याख्यानम् अकरोत्, तथा च सूर्यसिद्धान्तस्य भास्करसिद्धान्तस्य च सूक्ष्मं तुलनात्मकं विवेचनं प्रस्तुतवान्। अतः कर्तृवैलक्षण्यात् सौरभाष्यं सर्वत्र श्रेष्ठत्वं लभते।

**(२) गहनगणितीय-उपपत्तीनां प्रदर्शनम्**

सौरभाष्यस्य सर्वोत्कृष्टं वैशिष्ट्यं तस्य **'उपपत्तिप्रदर्शनम्'** अस्ति। भारतीयगणितपरम्परायां सूत्रस्य सत्यापनार्थम् उपपत्तेः महत्त्वं सर्वविदितम्। नृसिंहदैवज्ञेन केवलं श्लोकार्थं न विहाय प्रत्येकस्य गणितसूत्रस्य पृष्ठभूमिः का, कथं तत् सूत्रं निष्पन्नम् इति सोदाहरणं प्रदर्शितम्:

- **मध्यमाधिकारे:** भगण-अधिमास-अवमदिनानां तथा अहर्गणान-यनस्य सूक्ष्मा उपपत्तिः।
- **स्पष्टाधिकारे:** मन्दफल-शीघ्रफल-चापकरणयोःतथा ज्याउत्क्रमज्या-दीनां ज्यामितीयं विवेचनम्।
- **त्रिप्रश्नाधिकारे:**शङ्कुच्छाया-लग्न-नतांश-उन्नतांश-चरदलादीनां त्रिकोणमितीय-उपपत्तिः।

**(३) गोलशास्त्रे असाधारणं पाण्डित्यम्**

नृसिंहदैवज्ञेन स्वस्य *वासनावार्तिके* तथा *सौरभाष्ये* च **गोले स्वीयप्रज्ञां प्राचकटत्**। खगोलीयपिण्डानां वास्तविकं भ्रमणम् आकाशगोलके भवति। सौरभाष्ये क्रान्तिवृत्तं, विषुवद्वृत्तं, क्षितिज-वृत्तं , तथा याम्योत्तरवृत्तं इत्येतेषां परस्परसम्बन्धः अतीव सुस्पष्टतया वर्णितः। गोलीयत्रिकोणमितेः वृत्तक्षेत्रगणितस्य च उपयोगेन तेन ग्रहगतेः प्रत्यक्षं चित्रणम् उपस्थापितम्।

**(४) ग्रहणाधिकारे छेद्यकाधिकारे च सूक्ष्मं विवेचनम्**

सौरभाष्ये:

- लम्बनस्य नतेश्च सूक्ष्मा गणना दर्शिता।
- ग्रहणस्य स्पर्श-मध्य-मोक्षकालानां तथा स्थित्यर्थ-विमर्दार्धयोः गणितीयं रहस्यं सुबोधरीत्या व्याख्यातम्।
- **छेद्यकविधिः:** भूमिभागे रेखाचित्रं निर्माय कथं ग्रहणस्य प्रत्यक्षं दर्शनं कारणीयम् इति नृसिंहदैवज्ञेन सोदाहरणं प्रदर्शितम्।

**(५) अपूर्वं पदकृत्यं व्याकरणविश्लेषणञ्च**

नृसिंहदैवज्ञस्य परिवारः मीमांसा-वेदान्त-व्याकरणशास्त्रेषु निष्णातः आसीत्। सः सूर्यसिद्धान्तस्य प्रत्येकस्य श्लोकस्य पदच्छेदं, समासविग्रहं, कारकविभक्तिनिर्णयं, पारिभाषिकशब्दानां व्युत्पत्तिं च प्रदर्श्य यथार्थम् अर्थं स्पष्टयति। अनेन श्लोकस्य अर्थविषये लेशमात्रोऽपि सन्देहः नावशिष्यते।

**(६)पूर्वाचार्यमतानां समीक्षात्मकं खण्डनं**

नृसिंहदैवज्ञेन स्वभाष्ये ब्रह्मगुप्तः, लल्लाचार्यः, श्रीपतिः, भास्कराचार्यः, गणेशदैवज्ञः, तथा समकालीनः रङ्गनाथः (*गूढार्थप्रकाशिकाकारः*) इत्यादीनां मतानि उद्धृतानि। यत्र-यत्र अशुद्धयः अस्पष्टता वा दृश्यते, तत्र नृसिंहदैवज्ञेन युक्तियुक्तं खण्डनं कृत्वा सूर्यसिद्धान्तस्य यथार्थं सिद्धान्तं समर्थितम्।

**(७)यन्त्राधिकारे व्यावहारिकं ज्ञानम्**

त्रयोदशे **ज्योतिषोपनिषदधिकारे** गोलयन्त्रं, शङ्कुयन्त्रं, कपालयन्त्रं, नरयन्त्रं, घटिकायन्त्रम् इत्यादीनां खगोलीययन्त्राणां निर्माणविधिः वर्णितः अस्ति। नृसिंहदैवज्ञेन एतेषां यन्त्राणां निर्माणप्रक्रिया, तेषु जल-पारद-सूत्रादीनां प्रयोगः, तथा वेधशालायां प्रत्यक्षवेधस्य विधिः अतीव व्यावहारिकरीत्या व्याख्यातः।

**(८)उदाहरणैः सह पञ्चाङ्गगणितस्य सरलता एवं प्रांजला भाषाशैली**

सौरभाष्ये केवलं सैद्धान्तिकचर्चा नास्ति, अपितु प्रत्यक्षगणनाय स्वकालीनशकसंवत्सरस्य (शक १५३३) आधारेण **उदाहरणानि** अपि दत्तानि सन्ति। अस्य गद्यशैली अत्यन्तं प्रांजला, तर्कपूर्णा, सुबोधगम्या च वर्तते, या छात्रेभ्यः अध्यापकेभ्यः शोधकर्तृभ्यश्च कल्पवृक्षवत् उपकारिणी सिद्धा अस्ति।

**५. ज्योतिषपरम्परायां सौरभाष्यस्य प्रभावः योगदानञ्च**

नृसिंहदैवज्ञस्य सौरभाष्येण उत्तरभारतीयज्योतिषपरम्परायां नूतनः युगः आरब्धः::

1. **पञ्चाङ्गनिर्माणे प्रामाणिकता:** अद्यापि उत्तरभारते ये पञ्चाङ्ग-निर्मातारः सूर्यसिद्धान्तस्य अनुसरणं कुर्वन्ति, तेषां कृते सौरभाष्यम् एव सर्वप्रमुखः आधारग्रन्थः वर्तते।
2. **आधुनिकसम्पादनानां शोधकार्याणां च आधारः:** आधुनिककाले सूर्यसिद्धान्तस्य पाठसमीक्षात्मकसम्पादनेषु तथा आङ्ग्ल-हिन्दी-अनुवादेषु सौरभाष्यस्य व्याख्यानाम् एव मुख्यतया आश्रयः गृह्यते।

**उपसंहारः**

निष्कर्षरूपेण वक्तुं शक्यते यत् **आचार्यः नृसिंहदैवज्ञः** भारतीयखगोलशास्त्रस्य आकाशे देदीप्यमानः नक्षत्रविशेषः आसीत्। भारद्वाजगोत्रीये गोलवंशे समुत्पन्नेन तेन पञ्चविंशतितमे वयसि विरचितं **'सौरभाष्यम्'** न केवलं वर्तमानसूर्यसिद्धान्तस्य एका टीका अस्ति, अपितु तत् स्वयं संपूर्णं गणितीयं खगोलीयञ्च विश्वकोशः वर्तते। सूत्राणां गूढार्थप्रकाशनं, सूक्ष्मगणितीय-उपपत्तिः, गोलशास्त्रस्य स्पष्टं निरूपणं, पूर्वाचार्यमतानां समीक्षा, तथा सुलभा भाषाशैली — एतैः गुणैः युक्तं सौरभाष्यम् अद्यापि ज्योतिषशास्त्रस्य जिज्ञासूनां, छात्राणां, विदुषां च कृते सर्वोत्कृष्टं मार्गदर्शकं सिद्धं भवति।

## सन्दर्भग्रन्थसूची

१.रङ्गनाथः। (१९१३)। *श्रीसूर्यसिद्धान्तः गूढार्थप्रकाशसंस्कृतटीका-सहितः*(पण्डितबलदेवप्रसादमिश्रः,सम्पादकः)।खेमराजश्रीकृष्णदास, मुम्बई।

२.परमेश्वरः।(१९५७)। *सूर्यसिद्धान्तः परमेश्वरकृतविवरणव्याख्या-सहितः* (कृपाशङ्करशुक्लः, सम्पादकः)। लखनऊविश्वविद्यालयः, लखनऊ।

३.सुधाकरद्विवेदी। (१९८७)। *सूर्यसिद्धान्तः सुधावर्षिणीव्याख्या-सहितः* (श्रीकृष्णचन्द्रद्विवेदी, सम्पादकः)। सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयः, वाराणसी।

४.कमलाकरभट्टः। (१९९१)। *सूर्यसिद्धान्तः सौरवासनाव्याख्यासहितः* (श्रीचन्द्रपाण्डेयः, सम्पादकः)। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

५. नृसिंहदैवज्ञः। *सौरभाष्यम्* (सूर्यसिद्धान्तव्याख्या)।

६.डा.विनयकुमारपाण्डेय: । (२०२०) । ज्योतिष-सिद्धान्त-मञ्जूषा (चौखम्बासुरभारती प्रकाशनम्, वाराणसी ।

७.लगधमुनिः। प्रथमं संस्करणम् २०१४। वेदाङ्ज्योतिषम् (चौखम्बाविद्याभवनम्, वाराणसी)

## पाद टिप्पणी

[1]वेदाङ्गज्योतिषे,1,2

[2]नृसिंहदैवज्ञः। *सौरभाष्यम्* (सूर्यसिद्धान्तव्याख्या)

[3]नृसिंहदैवज्ञः। *सौरभाष्यम्* (सूर्यसिद्धान्त